प्राकृतावपि" माघः कामतस्तु प्रवृत्तानामिमाः स्युः क्रमशो वराः" मनुः "दिनेदिने त्वं तनुरेधि रेऽधिकम्" नैष० "आसीदिदं तमोभूतमप्रज्ञातमलक्षणम्" मनुः। "नत्वेवाहं जातु नासमिति" गीता। सन् सन्तौ सन्तः। "सदेव सोम्येदमग्र आसीत्" छा०उ० "योऽन्यथा सन्तमात्मानमन्यथा प्रतिपद्यते" मनुः। "नासतोविद्यततेऽभावोनाभावो विद्यते सतः" गीता स्त्रियां ङीप् "सती सती योगविसृष्टदेहा" कुमा० "सती वाऽविद्यमाना वा प्रकृतिः परिणामिनी हरिः वि+अति+व्यतिहारे परस्परमेकरूपेण स्थितौ "अन्यो व्यतिस्ते तु ममापि धर्म्मः" भट्टिः।

**अस** क्षेपे दिवा०पर०सक०सेट्। अस्यति अस्येत् अस्यतु आस्यत् आस्थत् आस। असिता-अस्ता असिष्यति। अस्यन् अस्यमानः अस्तः। असितुम्-अस्तुम्। असित्वा-अस्त्वा अभ्यस्य, निरस्य "आरे अस्मद्दैव्यं हेलो अस्यतु"। ऋ०१,११४,४, "दस्यवे हेतिमस्यार्य्यम्" ऋ०१,१०३,३, अति-अतिदूरक्षेपणे "बहुभिश्चैकमत्यस्यन्नेकेन च बहून् जनान्" भा०अत्यस्तः पा०। वि+अति। वैपरीत्येन स्थापने "व्यत्यस्तपाणिना कार्य्यमुपसंग्रहणं गुरोः" मनुः "व्यत्यासम्फलयोगतः" स्मृतिः अधि-आरोपे आरोपश्च अतस्मिन् तद्बुद्धिः अन्योपरिस्थापनञ्च आद्यार्थे "अप्रत्यक्षेऽपि ह्याकाशे बालास्तलमलिनताद्यध्यस्यन्ति" "आह कोऽयमध्यासोनाम" उच्यते स्मृतिरूपः परत्रपूर्व्वदृष्टावभासः" शा०भा०। अनु-पश्चात् सह वा क्षेपणे अन्वस्तः। "मुञ्जमेखला वल्कलेनान्वस्ता भवति" शत०ब्रा०। अप-दूरीकरणे "गतिरपास्तसंस्था मतिः" मालतीमा० "किमित्यपास्याभरणानि यौवने" कुमा०। अभि-अभ्यावृत्तौ, "अभ्यस्यन्ति तटाघातं निर्जितैरावता गजाः" कुमा० "अभ्यासेन तु कौन्तेय! वैराग्येण च गृह्यते" गीता। "शैशवेऽभ्यस्तविद्यानाम्" रघुः। अव-अवक्षेपे "तामवास्यतो गच्छति च स्रजम्" शत०ब्रा० समन्तात्क्षेपे "तामवास्यत्यागच्छति मुदम्" शत० ब्रा० उद्-ऊर्द्धोत्क्षेपणे "पुच्छमुदस्यति" सि०कौ०। परि+उद् भिन्नतया बोधने। "प्राधान्यं हि विधेर्यत्र प्रतिषेधेऽप्रधानता। पर्य्युदासः स विज्ञेयो यत्रोत्तरपदेन नञ्" मीमां० यथा श्राद्धादौ पर्य्युदस्तकालेरात्र्यादिः "अमावास्यायां पितृभ्योदद्यात्" "रात्रौ श्राद्धं न कुर्वीत" त्युभयोरेकवाक्यतया रात्रीतरामावस्यायां श्राद्धं कुर्व्वीतेति हि बोधः तत्र रात्रिः पर्य्युदस्ता एवमन्यत्रापि। परितःक्षेपणे च "अन्याः सर्व्वे पर्य्युदस्ता युधिष्ठिरनिवेशने" भा०स०प०। वि+उद्-निवारणे। "चीराणीव व्युदस्तानि रेजुस्तत्र महावने" "रामा० त्वन्तु हेतुनतोत्यैतान् कामक्रोधौ व्युदस्य च"। भा०स०प०। उप-समीपस्थापने "तस्याधस्तात्तद्बहिरुपास्यति चमसेषु" कात्या०१०,५, नि-अर्पणे "न मद्विधे न्यस्यति भारमग्र्यम्"। निक्षेपरूपेणार्पणे च "न्यासीकृता स्थानभिदा स्मरेण" कुमा० "राज्यं न्यासमिवाभुनक्" रघुः। उच्चारणपूर्व्वकं तत्र तत्र स्थाने अर्पणीतया ध्याने च। "आदावृष्यादिकन्यासः करशुद्धिस्ततः परम्। अङ्गुलिव्यापकन्यासौ हृदादिन्यास एव च" तन्त्रम्। उप+नि+आचारम्भणे "उपन्यासस्तु वाङ्मुखम्" अमरः। प्रथमप्रयोगे च "मतमप्यनुपन्यस्तं पूर्व्वमावेदितं न चेत्। हीयते व्यवहारेण" स्मृतिः "स तु तत्र विशेषदुर्लभः सदुपन्यस्यति कृत्यवर्त्म यः" किरा० सम्+नि त्यागे "व्रीड़ादमुं देवमुदीक्ष्य मन्ये संन्यस्तदेहः स्वयमेव कामः" कुमा० विहितकर्म्मणां विधानेन त्यागे च "दशलक्षणकं धर्म्ममनुतिष्ठन् समाहितः। वेदान्तं विधिवच्छ्रुत्वा सन्न्यस्येदनृणो द्विजः" मनुः। "न हि संन्यसनादेव सिद्धिं समधिगच्छति" "मयि संन्यस्य कर्म्माणि" गीता। निस्-निर्-निष्ठीवने दूरीकरणे च। निरस्यति "निष्ठीवति ष्ठिवु निरसने" पा०धातुपा० "निरस्तः परावसुः तृणनिरसने भवदेवः "निरस्तगाम्भीर्य्यमपास्तधैर्य्यम्" माघः "निरासभृङ्गं कुपितेव पद्मिनी" भट्टिः "क्वणदलिकुलनूपुरा निरासे" किरा०। त्वरितोच्चारणे च "निरस्तं त्वरितोदितम्" अमरः।

परा-निराकरणे "एतेन खण्डनकारमतमपि परास्तम्" चिन्ता०

परि-परावर्त्तनेन स्थापने "मुखेन पर्य्यस्तविलोचनेन" कुमा०। "पर्य्यस्यन्निह निचयः सहस्रसंख्याम्" किरा०। अर्पणे च "ताम्रौष्ठपर्य्यस्तरुचः स्मितस्य" कुमा०। वि-परि-वैपरीत्ये, परिवर्त्तने भ्रान्तिज्ञाने च "इतरथा पात्रे विपर्य्यस्येते" शत०ब्रा०। "संशयविपर्य्यासनिवारणेनेति" चिन्ता० "विपर्य्यासितदर्शनैः" बौद्धका०।

प्र-प्रक्षेपे "अप्सु प्रास्य विनष्टानि गृह्णीतान्यानि मन्त्रवत्" मनुः "अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते" गीता।

अनु-प्र-आनुलोम्येन अनुगततया एकरूपेण निवेशने अनुप्रासः

प्रति-प्रतिरूपक्षेपणे। "तद्यथाऽहिनिर्लयणी वल्मीके मृता प्रत्यस्ता शयीत" शत० ब्रा०।

वि-विशेषरूपेण सम्यगवबोधनाय निवेशने व्यासः विग्रहवाक्यम् तस्य समस्तवाक्यार्थस्य विशेषेणावबोधहेतुतया निवेशनात्